॥ श्रीमन्मूलरामो विजयते ॥

श्रीमद्धीरेन्द्रतीर्थविरचितव्याख्यानसहितम्

॥ श्रीराघवेन्द्रस्तोत्रम् ॥

श्रीमदानन्दतीर्थार्यहृदयाम्भोजवासिनौ ।
पद्माराधितपादाब्जौ कृष्णरामौ नमाम्यहम् ॥ १ ॥
श्रीराघवेन्द्रार्यगुरून्नत्वा वादीन्द्रदेशिकान् ।
राघवेन्द्रस्तुतेर्व्याख्यां करिष्ये बुद्धिशुद्धये ॥ २ ॥

इह खलु परमानन्दावाप्तितया निखिलापेक्षितमोक्षस्य गुरुप्रसाद-साध्यत्वात् तदर्थं गुरुमहिम्नस्तावद्वर्णयानः[1] अप्पणाचार्यस्तदीय-वाग्देवतासरित्प्रार्थनारूपं मङ्गलमादावाचरति श्रीपूर्णबोधेत्यादि-श्लोकद्वयेन—

श्रीपूर्णबोधगुरुतीर्थपयोब्धिपारा
कामारिमाक्षविषमाक्षशिरः स्पृशन्ती ।
पूर्वोत्तरामिततरङ्गचरत्सुहंसा
देवालिसेवितपरांघ्रिपयोजलग्ना ॥ १ ॥

अत्र गुरुराघवेन्द्रवाग्देवतासरित् अमरनदी । अमुं भक्तजनं विमलीकरोतु निर्मलीकरोत्विति[2] क्रियाकारकयोजना । अत्र

[1] वर्णयन् इति पा.   [2] निर्मलं इति पा.

Scanned by CamScanner

वाग्देवतायाः सरित्त्वेन निरूपणे तन्निष्ठधर्मवत्तया भाव्यम्। के ते देवतासरिन्निष्ठधर्माः यद्वत्त्वेनास्याः तत्वेन[1] निरूपणमित्यतः तानुपपादयति। **श्रीपूर्णबोधेति**। श्रिया कान्त्या पूर्णः पूरितः शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिति गद्यत इति यादवः, 'पूर्णस्तुपूरिते' इत्यमरः। बोधो बुधः तस्य गुरुः पिता पूर्णचन्द्र इति यावत्। बुधो बोधो बोधनश्च इति द्विरूपकोशः, गुरू गीष्पतिपित्राद्यौ इत्यमरः। तस्य तीर्थं योनिः उत्पत्तिस्थानमिति यावत्। जलावतारो गुरुयोन्युपायशास्त्राणि यज्ञो मुनयश्च तीर्थमिति नानार्थरत्नमाला। स चासौ पयोधिश्च पयांसि उदकानि धीयन्तेऽस्मिन्निति पयोधिः। समुद्रः स एव पारमवधिः यस्याः सा तथोक्ता। पारं स्यादवधौ तीरविशेषे पारदे पुमानित्यमरः[2]। वाक्पक्षे श्री[3]पूर्णःबोधो ज्ञानं यस्य स तथोक्तः। स चासौ गुरुः देशिकश्च। देशिको गुरुराचार्य इति वैजयन्ती। तस्य तीर्थं शास्त्रं तदेव पयोधिः समुद्रः स एव पारं परं तीरं यस्याः सा तथोक्ता। पारावरे परार्वाची तीरे इत्यमरः। कामस्य मन्मथस्य अरिः रिपुः स चासौ माक्षश्च मा ज्ञानमेवाक्षमिन्द्रियं यस्य स तथोक्तः। अक्षमिन्द्रियमित्यमरः। विषमाक्षो रुद्रः, तस्य शिरः मूर्धानं स्पृशन्ती तत्स्पर्शवती रुद्रशिरोगामिनीत्यर्थः।

---

[1] सरित्वेन वर्णनम् इति पा.

[2] इति यादवः इति पा.—इति विश्वः इति पा.

[3] श्रिया लक्ष्म्या युतः इति पा.

Scanned by CamScanner

वाक्पक्षे कामस्य कामक्रोधादेः अरिः शत्रुभूता मा ज्ञानमेव अक्षमिन्द्रियम् । तेन विषमे अक्षिणी नयने येषां ते तथोक्ताः ज्ञानिन इत्यर्थः । तेषां शिरः स्पृशन्ती शिरसा श्लाघनीया वन्दनीयेत्यर्थः । सरित्पक्षे पूर्वोत्तराः पूर्वपश्चिमाः अमिताः मिति-रहिताः तरंगा ऊर्मयः तेषु चरन्तः सञ्चरन्तः शोभनाः हंसाः मरालाः यस्यां सा तथोक्ता । वाक्पक्षे पूर्वोत्तराः पूर्वपक्षसिद्धान्ताः पूर्वोत्तरमीमांसे वा तान् अमिततरं गच्छन्ति अवगच्छन्तीत्य-मिततरंगाः तान् चरन्तः परिचरन्तः हंसाः यतयः निर्मलभूभुजो वा यतयश्च यस्यां सा । चरत्सुहंसाः । हंसः सूर्ये खगे विष्णौ यतौ निर्मलभूभुजीति नानार्थरत्नमाला । सरित्पक्षे देवा एवालयः भ्रमराः तैः सेविते, परस्य परमात्मनः परोऽरिपरमात्मनोरिति नानार्थरत्नमाला । अंघ्री पयोजे इव अंघ्रिपयोजे तयोर्लग्ना संबद्धा तत्प्रक्षालनादुद्भूतेति भावः । वाक्पक्षेऽपि देवाः ब्रह्मादिसुराः तेषामालयः पंक्तयः तैः सेवितं परस्य नारायणस्य अंघ्री उत्तमानां स्वरूपं तु पादशब्देन भण्यते इति वचनात् पादाङ्घ्रिशब्दयोः पर्यायत्वात्, घटः करीरः कलश इत्यादिवत्, तस्मिन् लग्ना तत्स्वरूपप्रतिपादिका इत्यर्थः ॥ १ ॥

जीवेशभेदगुणपूर्तिजगत्सुसत्त्व
नीचोच्चभावमुखनक्रगणैः समेता ।
दुर्वाद्यजापतिगिलैर्गुरुराघवेन्द्र-
वाग्देवतासरिदमुं विमलीकरोतु ॥ २ ॥

*

॥ जीवेति ॥ जीवाः प्राणिनः तेषामीशाः स्वामिनः, 'जीवो बृहस्पतिप्राणिजीवनात्मद्रुमेषु[1] ना' इति रत्नमाला। तेषां भेदो विदारणं 'भेदस्स्यादुपतापेऽपि विदारणविरोधयो[विशेषयो]रिति रत्नमाला। स एव गुणः तस्य पूर्त्या पूरणेन[2] जगति लोके। शोभनं सत्वं पराक्रमः येषां ते सुसत्वाः तथोक्ताः। नीचोच्चभावः निम्नतौन्नत्ये मुखेषु येषां ते नीचोच्चभावमुखाः ते च ते नक्राश्च मकराः तेषां गणैः समूहैः समेता युक्ता। सत्वं द्रव्ये पिशाचादौ व्यवसाये पराक्रमे इति रत्नमाला। वाक्पक्षे दुर्वादिनो दुष्टाः प्रतिवादिनः मायावाद्यादय इति यावत् त एव अजापतयः बस्ताः, होतु इति अपभ्रष्टसंज्ञा, तान् गिलन्ति भक्षयन्ति इति गिलाः तैर्गिलैरित्यर्थः। जीवश्च ईशश्च जीवेशौ तयोर्भेदः गुणपूर्तिः गुणपूर्णत्वं च जगतः प्रपञ्चस्य सुसत्वं शोभनसत्यत्वं च पारमार्थिक-सत्यत्वमिति यावत्। नीचोच्चभावः तारतम्यं च तदेव मुखं प्रधानं येषां ते तथोक्ताः। त एव नक्राः तेषां गणैः निचयैः समवायश्चयो गणः इत्यमरः। गुरुश्चासौ राघवेन्द्रश्च गुरुराघवेन्द्रः तस्य वाक् वाण्येव देवतासरित् अमरनदी, अमुं सेवकं भक्तजनं विमलीकरोतु पवित्रीकरोत्विति। अत्र वाचः देवतासरित्त्वेन निरूपणाद्रूपकालङ्कारः। वसन्ततिलकावृत्तम्। 'उक्ता वसन्त-तिलका तभजा जगौ गः' इति तल्लक्षणात् ॥ २ ॥

---

[1] जीवानात्मद्रुमेषु च इति पा. [2] पूर्णत्वेन इति पा.

Scanned by CamScanner

श्रीराघवेन्द्रः सकलप्रदाता
स्वपादकंजद्वयभक्तिमद्भ्यः ।
अघाद्रिसंभेदनदृष्टिवज्रः
क्षमासुरेन्द्रोऽवतु मां सदायम् ॥ ३ ॥

श्रीराघवेन्द्रेति । स्वस्य पादौ स्वपादौ कंजयोर्द्वयं कंजद्वयं स्वपादावेव कंजद्वयं पद्मयुगलं तयोर्भक्तिरेषामस्तीति तथोक्ताः । तेभ्यः सकलप्रदाता सर्वाभीष्टप्रद इत्यर्थः । अघान्येवाद्रयः पर्वताः तेषां सम्भेदने विदारणे दृष्टिर्दर्शनमेव वज्रं पविर्यस्य सः तथोक्तः । दृष्टिर्ज्ञानेऽक्ष्णि दर्शन इति, वज्रोऽस्त्री हीरके पवौ इत्यमरः । क्षमासुराणां भूसुराणां देवानां ब्राह्मणानां च इन्द्रः श्रेष्ठ इत्यर्थः । क्ष्मावनिर्मेदिनी महीत्यमरः । श्रीराघवेन्द्रः अयं सदा सर्वदा मां अवतु रक्षतु । अव रक्षणे इति धातोः लोट् । अत्रापि दृष्टेः वज्रत्वेन निरूपणाद्रूपकालङ्कारः । इन्द्रवज्रा वृत्तम् ॥ ३ ॥

श्रीराघवेन्द्रो हरिपादकञ्ज-
निषेवणाल्लब्धसमस्तसंपत् ।
देवस्वभावो दिविजद्रुमोऽय-
मिष्टप्रदो मे सततं स भूयात् ॥ ४ ॥

श्रीराघवेन्द्र इति ॥ हरेः पादावेव कञ्जे तयोः नितरां सेवनात् लब्धा प्राप्ता समस्तसम्पत् ऐहिकामुष्मिकैश्वर्यं यस्य स

Scanned by CamScanner

तथोक्तः । देवस्वभावः देवतास्वरूपः देवावतार इति यावत् । स्वरूपं च स्वभावश्चेत्यमरः । दिविजद्रुमः कल्पवृक्ष इत्यर्थः । एतादृशो राघवेन्द्रः इष्टप्रदः अभीष्टप्रदाता भूयात् । भू सत्तायामाशीर्लिङ् ॥ ४ ॥

भव्यस्वरूपो भवदुःखतूल-
सङ्घाग्निचर्यस्सुखधैर्यशाली ।
समस्तदुष्टग्रहनिग्रहेशो
दुरत्ययोपप्लवसिन्धुसेतुः ॥ ५ ॥

भव्येति ॥ भव्यं कुशलं स्वरूपं स्वभावो यस्य स तथोक्तः । भवे जातं दुःखं भवदुःखं तदेव तूलसंघः तस्य अग्निचर्यः पावकसम इत्यर्थः । सुखं च धैर्यं च सुखधैर्ये ते अस्य स्त इति सुखधैर्यशाली । समस्तानां निखिलानां ग्रहाणां पिशाचादीनां निग्रहेशो निवर्तकः । विघ्नेश इतिवदिदं ज्ञेयम् । दुरत्ययाः अत्येतुमशक्याः उपप्लवाः उपद्रवाः त एव सिन्धवः समुद्राः तेषां सेतुरिव सेतुः पारप्रापक इत्यर्थः ॥ ५ ॥

निरस्तदोषो निरवद्यवेषः
प्रत्यर्थिमूकत्वनिदानभाषः ।
विद्वत्परिज्ञेयमहाविशेषो
वाग्वैखरीनिर्जितभव्यशेषः ॥ ६ ॥

Scanned by CamScanner

निरस्तेति ॥ निरस्ता: दोषा: रागादयो येन स: तथोक्त:। निरवद्यवेष: अवद्यात् कुत्सितात् निर्गत: निरवद्य: वेष: आकारो यस्य स तथोक्त:। प्रत्यर्थिनां परिपन्थिनां मूकत्वस्य मूकभावस्य निदानं आदिकारणं भाषा गीर्यस्य स तथोक्त:। विद्वद्भि: परिज्ञेय: ज्ञातव्य: महान् विशेषो यस्य स तथोक्त:। वाग्वैखर्या वाग्विलासेन निर्जित: पराजित: भव्य: कुशल: शेष: येन स तथोक्त:। क्षेमं शुभं च कल्याणं श्रेयो भद्रं च मङ्गलम्। भावुकं भविकं भव्यमिति धनञ्जय:[1] ॥ ६ ॥

सन्तानसंपत्परिशुद्धभक्ति-
विज्ञानवाग्देहसुपाटवादीन्।
दत्वा शरीरोत्थसमस्तदोषान्
हत्वा स नोऽव्याद्गुरुराघवेन्द्र: ॥ ७ ॥

सन्तानेति ॥ स: पूर्वश्लोकद्वयोक्तगुणविशिष्ट: राघवेन्द्र: राघवेन्द्रगुरु: सन्तानं सन्तति: सम्पत् ऐश्वर्यं परिशुद्धा निर्मला भक्ति: माहात्म्यज्ञानपूर्वकसुदृढस्नेह: विज्ञानं विशिष्टज्ञानं वाक्च देहश्च वाग्देहौ तयो: शोभनं पाटवं पटुत्वं तदेव आदि: येषां ते तथोक्ता:। तान् दत्वा प्रदाय शरीरोत्थान् देहजनितान् समस्तान्

---

[1] वाग्वैखर्या तन्नामकग्रन्थेन निर्जित: भव्य: कुशल: शेष: तन्नामक: प्रतिवादी येन स: तथोक्त — इत्यपि ॥

दोषान् पापादीन् हत्वा निरस्य नः अस्मान् अव्यात् रक्षतु अव रक्षण इति धातोर्लिङ्, इति श्लोकत्रयमेकाक्रियान्वितम् ॥ ७ ॥

यत्पादोदकसञ्चयस्सुरनदीमुख्यापगासादिता-
संख्यानुत्तमपुण्यसङ्घविलसत्प्रख्यातपुण्यावहः ।
दुस्तापत्रयनाशनो भुवि महावन्ध्यासुपुत्रप्रदो
ऽव्यङ्गस्वङ्गसमृद्धिदो ग्रहमहापापापहस्तं श्रये ॥८॥

यत्पादोकसंचय इति ॥ यस्य राघवेन्द्रगुरोः पादोदकसंचयः पादप्रक्षालनोदकसमूहः सुरनदी गङ्गेव मुख्या प्रधाना यासां ताः तथोक्ताः । आपगाः नद्यः ताभिरासादितानि प्राप्तानि न विद्यते संख्या येषां तानि असंख्यानि, न विद्यते उत्तमानि येभ्यस्तान्यनुत्तमानि तानि च तानि पुण्यानि च तेषां संघः समूहः स एव विलसद्दीप्यमानं प्रख्यातं प्रसिद्धं पुण्यं सुकृतं तत् आवहतीत्यावहः दुष्टतापानामाध्यात्मिकाधिभौतिकाधिदैविकादीनां त्रयं नाशयतीति नाशनः तापत्रयपरिहारक इत्यर्थः । भुवि भूमौ महत्याः वन्ध्यायाः वन्ध्यात्वेनाभिमतायाः शोभनपुत्रप्रदः[1] । व्यंगानां अंगविकलानां सुष्ठु अंगसमृद्धिं अंगपाटवं ददातीति व्यंगस्वंगसमृद्धिदः, ग्रहाः शाकिन्यादयः महापापानि ब्रह्महत्यादीनि तानि अपहंतीति अपहः तं एतादृशस्वपादोदकमाहात्म्यवन्तं

---

[1] शोभमानपुत्रदः इति पा.

राघवेन्द्रगुरुं श्रये सेवे । श्रिञ् सेवायामिति धातोर्लट् । अत्र जातिरलङ्कारः स्वभावोक्तिर्वा । शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

यत्पादकञ्जरजसा परिभूषिताङ्गा
यत्पादपद्ममधुपायितमानसा ये ।
यत्पादपद्मपरिकीर्तनजीर्णवाच-
स्तद्दर्शनं दुरितकाननदावभूतम्   ॥ ९ ॥

यत्पादकंजेति ॥ यस्य राघवेन्द्रगुरोः पादावेव कंजे पद्मे तयोः रजसा पांसुना भूषितमलङ्कृतमङ्गं अवयवः येषां ते तथोक्ताः । यत्पादपद्मयोः मधुपायितानि भ्रमरवदाचरितानि मानसानि मनांसि येषां ते तथोक्ताः । यत्पादपद्मयोः परिकीर्तनेन संकीर्तनेन तद्गुणकथनेनेति यावत् । जीर्णानि परिपक्वानि वचांसि येषां ते तथोक्ताः, तद्दर्शनं तेषां राघवेन्द्रगुरुभक्तानां दर्शनं, दुरितकाननस्य दुष्कृतवनस्य दावभूतं दावाग्निसदृशमित्यर्थः । अनेन तद्भक्तानामेव दुरितपरिहारकत्वात् तेषां दुरितपरिहारकत्वं कैमुत्यन्यायसिद्धमिति भावः । अत्र रूपकालङ्कारः पादयोः कंजत्वेन निरूपणात् । वसन्ततिलकावृत्तम् ॥ ९ ॥

सर्वतन्त्रस्वतन्त्रोऽसौ श्रीमध्वमतवर्धनः ।
विजयीन्द्रकराब्जोत्थसुधीन्द्रवरपुत्रकः ॥१०॥

Scanned by CamScanner

सर्वतन्त्रेति ॥ सर्वतन्त्रेषु सर्वसिद्धान्तेषु स्वतन्त्रः स्वाधीनः श्रिया सहितो मध्वः आनन्दतीर्थः तस्य मतं सिद्धान्तं वर्धयतीति वर्धनः । विजयीन्द्रकरावेव अब्जे ताभ्यां उत्थः उत्पन्नः स चासौ सुधीन्द्रः सुधीन्द्रगुरुः तस्य वरपुत्रकः वरकुमारक इत्यर्थः ॥१०॥

श्रीराघवेन्द्रो यतिराड्गुरुर्मे स्याद्भयापहः ।
ज्ञानभक्तिसुपुत्रायुर्यशः श्रीपुण्यवर्धनः ॥११॥

श्रीराघवेन्द्रेति ॥ ज्ञानं भक्तिः स्नेहः सुपुत्राः शोभनाः पुत्राः कुमाराः आयुश्च आयुष्यं यशः कीर्तिः श्रीः सम्पत् पुण्यं सुकृतं तानि वर्धयतीति तथोक्तः । यतिराट् यतिश्रेष्ठः परमहंस इति यावत् श्रीराघवेन्द्राभिधः गुरुराचार्यः भयापहः भयापहारी स्यात् । भूयात् अस भुवि आशीर्लिङ् ॥ ११ ॥

प्रतिवादिजयस्वान्तभेदचिह्नादरो गुरुः ।
सर्वविद्याप्रवीणोऽन्यो राघवेन्द्रान्न विद्यते ॥१२॥

प्रतिवादीति ॥ प्रतिवादिनां परवादिनां जयः अभिभवः, स्वान्तभेदः स्वान्तस्य मनसः भेदः विदारणं चाञ्चल्यं तयोः चिह्नं लक्ष्म ‘ चिह्नं लक्ष्म च लक्षण ’ मित्यमरः । तस्मिन्नादरो यस्य स तथोक्तः ॥ गुरुर्देशिकः, सर्वविद्याप्रवीणः समस्तशास्त्रनिपुणः राघवेन्द्रादन्यः अपरः न विद्यते नास्तीत्यर्थः । विद सत्तायामिति धातोर्लट् ॥ १२ ॥

Scanned by CamScanner

अपरोक्षीकृतश्रीशः समुपेक्षितभावजः ।
अपेक्षितप्रदाताऽन्यो राघवेन्द्रान्न विद्यते ॥१३॥

अपरोक्षीकृतेति ॥ अपरोक्षीकृतः प्रत्यक्षीकृतः श्रीशः परमात्मा येन सः तथोक्तः[1]। अपेक्षितस्य वांछितस्य प्रदाता दानशीलः राघवेन्द्रगुरोरन्यः न विद्यते न वर्तते । इह श्लोकद्वये उत्तरश्लोके च सादित्यार्णवेत्यत्रेव उपमा, लुप्तोपमालङ्कारः ॥१३॥

दयादाक्षिण्यवैराग्यवाक्पाटवमुखाङ्कितः ।
शापानुग्रहशक्तोऽन्यो राघवेंद्रान्न विद्यते ॥१४॥

दयेति ॥ दया निरुपाधिकपरदुःखप्रहाणेच्छा, दाक्षिण्यं चातुर्यं वैराग्यं विषयविरक्तिः । वाक्पाटवं वचःपटुत्वं तान्येव मुखं प्रधानं येषां ते तथोक्ताः । दयाचातुर्यादिगुणाः तैः अङ्कितः चिह्नितः शापश्चानुग्रहश्च तयोः शक्तः समर्थश्च राघवेन्द्रादन्यः न विद्यत इति ॥ १४ ॥

अज्ञानविस्मृतिभ्रान्तिसंशयापस्मृतिक्षयाः ।
तन्द्राकम्पवचःकौण्ठ्यमुखा ये चेन्द्रियोद्भवाः ।
दोषास्ते नाशमायान्ति राघवेन्द्रप्रसादतः ॥१५॥

---

[1] भावयति जगदिति भावः विष्णुः (भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः इति विष्णुसहस्रनामसु पाठात्) तज्जः मन्मथः, समुपेक्षितः भावजः येन सः ।

Scanned by CamScanner

अज्ञानेति ॥ अज्ञानं ज्ञानाभावः विस्मृतिः विस्मरणं भ्रान्तिरन्यथाप्रतीतिः, संशयः इदमदोवेत्याकारकः मनोवृत्ति-विशेषः अपस्मृतिरपस्मारः क्षयः राजयक्ष्मा तन्द्रा मूर्छा (श्रमजन्य-व्यापारशून्यता वा) अंगचाञ्चल्यं [वेपथुः] वचःकौण्ठ्यं वचः-कुटिलता त एव मुखं येषां ते तथोक्ताः । अनन्तरमिन्द्रियोद्भवाः यावदिन्द्रियोत्पन्नाः ये दोषाः रागादयः ते सर्वेऽपि राघवेन्द्रगुरोः प्रसादतः अनुग्रहात् नाशं क्षयं आयान्ति या प्रापण इति धातो-र्लट् । जातिरलङ्कारः ॥ १५ ॥

ॐ श्रीराघवेद्राय नमः इत्यष्टाक्षरमन्त्रतः ।
जपिताद्भावितान्नित्यमिष्टार्थास्स्युर्न संशयः ॥१६॥

श्रीराघवेन्द्रायेति ॥ श्रीराघवेन्द्राय नमः इत्याष्टाक्षरमन्त्रः । अस्य मन्त्रस्य ऋष्यादिकं तु मन्त्रद्रष्टा ऋषिरित्युक्तेः अप्पणाचार्य-ऋषिः । तस्य प्रथमद्रष्टृत्वात् । अक्षरपरिगणनया दैवी गायत्री छन्दः, श्रीराघवेन्द्रगुर्वन्तर्गतश्रीरामचन्द्रो देवता । अथाङ्गन्यासः श्रीं हृदयाय नमः । राघवेन्द्राय शिरसे स्वाहा । नमः शिखायै वौषट् श्रीं कवचाय हुं । राघवेन्द्राय नेत्राभ्यां वौषट् । नमः अस्त्राय फट्, इति दिग्बन्धः । अथ ध्यानम् ॥ १६ ॥

तप्तकाञ्चनसङ्काशं अक्षमालां कमण्डलुम् ।
दोर्भ्यां दधानं काषायवसनं राममानसम् ॥

Scanned by CamScanner

योगीन्द्रतीर्थवन्द्याङ्घ्रिं तुलसीदामवक्षसम्[1] ।
ज्ञानभक्तितपःपूर्णं ध्यायेत्सर्वार्थसिद्धये ॥

जपितात् ॥ जपविषयीकृतात् अष्टाक्षरमन्त्रतः नित्यमजस्रं भावितात् भावनं परमात्मध्यानं तद्विषयीकृतात् इष्टार्थाः वांछित-प्रयोजनानि स्युः भवेयुः । अत्र संशयः सन्देहो न कर्तव्य इत्यर्थः । उत्तरार्धं उत्तरश्लोकान्वितम् । कायजान् शरीरोत्पन्नान् आत्मा स्वयं आत्मीयाः स्वसम्बन्धिनः तैः समुद्भवान् दोषान् पापानि हन्तु नाशयतु । हन हिंसागत्योरिति धातोर्लोट् ॥

हन्तु नः कायजान्दोषानात्मात्मीयसमुद्भवान् ।
सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित् ॥ १७ ॥

सर्वानिति ॥ सर्वान् समस्तान् पुमर्थान् धर्मादिचतुर्विध-पुरुषार्थान् आत्मवित् परमात्मज्ञानी गुरुः ददातु प्रयच्छतु डुदाञ् दाने इति धातोर्लोट् ॥ १७ ॥

इति कालत्रये नित्यं प्रार्थनां यः करोति सः ।
इहामुत्राप्तसर्वेष्टो मोदते नात्र संशयः ॥ १८ ॥

इति ॥ पूर्वोक्तप्रकारेण यः पुमान् कालत्रये त्रिसन्ध्यायां प्रार्थनां याच्ञां करोति कुरुते डुकृञ् करणे इत्यस्माद्धातोः लट् ॥ १८ ॥

---

[1] भूषितम् ।

इहास्मिन् लोके अमुत्र परलोके च आप्तसर्वेष्टः आप्तानि प्राप्तानि सर्वाणि इष्टानि अभीष्टानि येन सः तथोक्तः। मोदते सन्तुष्टो भवति मुद हर्ष इति धातोर्लट्, अत्रास्मिन्नर्थे संशयो न कर्तव्य इत्यर्थः ॥ १८ ॥

अगम्यमहिमा लोके राघवेन्द्रो महायशाः ।
श्रीमध्वमतदुग्धाब्धिचन्द्रोऽवतु सदानघः ॥१९॥

अगम्येति ॥ लोके भुवने 'लोकस्तु भुवने जने' इत्यमरः, अगम्या अज्ञेया महिमा माहात्म्यं यस्य सः तथोक्तः। महत् यशः यस्य सः महायशाः श्रिया सहितः मध्वः श्रीमध्वः तस्य मतं सिद्धान्तः तदेव दुग्धाब्धिः क्षीरसमुद्रः तस्य चन्द्र इव चन्द्रः अभिवृद्धिकरः इत्यर्थः एतादृशो राघवेन्द्रः अवतु रक्षतु मामिति शेषः। अव रक्षणे इति धातोर्लोट् ॥ १९ ॥

सर्वयात्राफलावाप्त्यै यथाशक्ति प्रदक्षिणम् ।
करोमि तव सिद्धस्य वृन्दावनगतं जलम् ।
शिरसा धारयाम्यद्य सर्वतीर्थफलाप्तये ॥ २० ॥

सर्वाश्च ताः यात्राश्च तासां फलस्य अवाप्तिः तस्यै यथाशक्ति शक्तिमनतिक्रम्य प्रदक्षिणं परिवर्तनं, इदमपि उत्तरश्लोकस्थ-करोमीति क्रियया अन्वितम् ॥ करोमीति पूर्वेणान्वयः। सिद्धस्य ज्ञानसिद्धिं प्राप्तस्य तव वृन्दावनगतं वृन्दावनाभिषिक्तं जलं

Scanned by CamScanner

सर्वतीर्थफलाप्तये सर्वेषु तीर्थेषु स्नानजं यत्फलं तादृशफलाप्तये शिरसा मस्तकेन अद्येदानीं धारयामि धृञ् धारणे इति धातोर्णिजन्ताल्लट् ॥ २० ॥

सर्वाभीष्टार्थसिद्ध्यर्थं नमस्कारं करोम्यहम् ।
तव सङ्कीर्तनं वेदशास्त्रार्थज्ञानसिद्धये ॥ २१ ॥

सर्वाभीष्टार्थेति ॥ सर्वेषामभीष्टानां अभीप्सितानां अर्थानां सिद्ध्यर्थं अहं त्वां नमस्करोमि । नमःशब्दोपपदात् डुकृञ् करण इति धातोः लट् । तव भवतः सङ्कीर्तनं नामोच्चारणं वेदशास्त्रार्थज्ञानसिद्धये वेदानां ऋग्वेदादीनां शास्त्राणां च अर्थाः प्रतिपाद्याः (विषयाः) । तेषां ज्ञानं तस्य सिद्धये प्राप्तये करोमीति पूर्वेणान्वयः ॥ २१ ॥

संसारेऽक्षयसागरे प्रकृतितोऽगाधे सदा दुस्तरे
सर्वावद्यजलग्रहैरनुपमैः कामादिभङ्गाकुले ।
नानाविभ्रमदुर्भ्रमेऽमितभयस्तोमादिफेनोत्कटे
दुःखोत्कृष्टविषे समुद्धर गुरो मां मग्नरूपं
सदा ॥ २२ ॥

संसारेति ॥ प्रकृतितः स्वभावतः अगाधे अतलस्पर्शे अगाधमतलस्पर्शमित्यमरः । सदा सर्वदा अनुपमैः न विद्यते उपमा सादृश्यं येषां ते अनुपमाः तैः सर्वावद्यजलग्रहैः सर्वे च ते

Scanned by CamScanner

अवद्याश्च दोषाश्च त एव जलग्रहा: जलपिशाचा: जलचरप्राणिनो वा तै: युक्ते कामादिभंगाकुले कामादय: कामक्रोधाद्यरिषड्वर्गा: त एव भंगा ऊर्मय: तैराकुले व्याकुले व्याप्त इति यावत्। नाना-विभ्रमदुर्भ्रमे नाना अनेकविधा: ते च ते विभ्रमा: स्त्रीणां विलासा: 'स्त्रीणां विलासो बिब्बोको विभ्रमो ललितं तथे'त्यमर:। त एव दुष्टा: भ्रमा: जलनिर्गमा: आवर्ता इत्यर्थ:। स्यादावर्तोऽ-म्भसां भ्रम: इत्यमर:। यस्मिन्स तथोक्त:, तस्मिन् अमितभयस्तो-मादिफेनोत्कटे अमितानि मितिरहितानि भयानि भीतय: तेषां स्तोम: वृन्दं तदेवादिर्येषां ते तथोक्ता: स्तोम: स्तोत्रेऽध्वरे वृन्द इत्यमर:। तान्येव फेना: अब्धिकफा: तै: उत्कटे। उत्कृष्टे डिंडीरोऽ-ब्धिकफ: फेन: इत्यमर:। दुस्सहे दु:खोत्कृष्टविषे दु:खान्येव उत्कृष्टविषाणि गरलानि जलानि वा यस्मिन्स: तस्मिन्नक्षयसागरे अशोष्यसमुद्रे संसारे मग्नरूपं मग्नप्रायं मा मां हे गुरो समुद्धर सम्यगुद्धर उत्तारय, सम् उत् पूर्वात् धृञ् धारण इति धातोर्लोट् ॥ २२ ॥

राघवेन्द्रगुरुस्तोत्रं य: पठेद्भक्तिपूर्वकम् ।
तस्य कुष्ठादिरोगाणां निवृत्तिस्त्वरया भवेत् ॥
॥ २३ ॥

राघवेन्द्रगुर्विति। स्पष्टार्थमेतत् ॥ २३ ॥

Scanned by CamScanner

अन्धोऽपि दिव्यदृष्टिस्स्यादेडमूकोऽपि वाक्पतिः ।
पूर्णायुः पूर्णसंपत्तिः स्तोत्रस्यास्य जपाद्भवेत् ॥
॥ २४ ॥

एडमूकोऽपि वक्तुं श्रोतुं अशिक्षितोऽपि, वाक्पतिः बृहस्पतिः स्यात् वक्ता भवति ॥ पूर्णायुरिति इदमपि स्पष्टम् ॥ २४ ॥

यः पिबेज्जलमेतेन स्तोत्रेणैवाभिमन्त्रितम् ।
तस्य कुक्षिगता दोषास्सर्वे नश्यन्ति तत्क्षणात् ॥
॥ २५ ॥

यः पिबेदिति ॥ यः एतेन स्तोत्रेण उच्चारितेन अभिमंत्रितं सम्यङ्मन्त्रितं जलं पिबेत्, तस्य कुक्षिगताः दोषाः गुल्मव्याध्यादयो रोगाः सर्वे तत्क्षणात् नश्यन्ति ॥ २५ ॥

यद्वृन्दावनमासाद्य पंगुः खञ्जोऽपि वा जनः ।
स्तोत्रेणानेन यः कुर्यात्प्रदक्षिणनमस्कृती ।
स जङ्घालो भवेदेव गुरुराजप्रसादतः ॥ २६ ॥

सोमसूर्योपरागे च पुष्यार्कादिसमागमे ।
योऽनुत्तममिदं स्तोत्रमष्टोत्तरशतं जपेत् ।
भूतप्रेतपिशाचादिपीडा तस्य न जायते ॥२७॥

Scanned by CamScanner

पङ्गुर्वृन्दावनेति ॥ पंगुः अपदः खञ्जोऽपि एकपादोऽपि यो जनः अनेन गुरुस्तोत्रेण प्रदक्षिणं च नमस्कृतिश्च प्रदक्षिणनमस्कृती करोति सः जङ्घालुः अतिजवः । जंघालोऽतिजवस्तुल्याविल्यमरः, भवेत् भवति । भूसत्तायां लिङ् ॥ सोमसूर्ययोः उपरागे ग्रहणे पुष्यः पुष्यनक्षत्रं अर्कः भानुवारः तयोः एतत्स्तोत्रपठनफलमाह ।

योऽनुत्तममिति ॥ समागमो मेलनं तस्मिन् यः पुरुषः अनुत्तमं न विद्यते उत्तमं यस्मात् तत् इदं प्रसिद्धं स्तोत्रं अष्टोत्तरशतं अष्टाधिकशतं जपेत् जपति तस्य भूतादीनां पीडा न जायते ॥ २६-२७ ॥

एतत्स्तोत्रं समुच्चार्य गुरोर्वृन्दावनान्तिके ।
दीपसंयोजनाज्ज्ञानं पुत्रलाभो भवेद्ध्रुवम् ॥
॥ २८ ॥

स्तोत्रं समुच्चार्य दीपसंयोजनात् ज्ञानं पुत्रलाभः ॥ २८ ॥

परवादिजयो दिव्यज्ञानभक्त्यादिवर्धनम् ।
सर्वाभीष्टप्रवृद्धिस्स्यान्नात्र कार्या विचारणा ॥
॥ २९ ॥

परवादिजयः ज्ञानभक्त्यादिवर्धनं वृद्धिः सर्वाभीष्टप्रवृद्धिश्च ध्रुवं भवेदित्यन्वयः ॥ २९ ॥

Scanned by CamScanner

राजचोरमहाव्याघ्रसर्पनक्रादिपीडनम् ।
न जायतेऽस्य स्तोत्रस्य प्रभावान्नात्र संशयः ॥ ३० ॥

अस्य स्तोत्रस्य प्रभावात् जपसामर्थ्यात् जन्तुः राज, चोरः महाव्याघ्राः सर्पाः नक्राः जलग्रहाः त एव आदिर्येषां ते तथोक्ताः तेषां पीडा पीडनं न जायते ॥ ३० ॥

यो भक्त्या गुरुराघवेंद्रचरणद्वंद्वं स्मरन् यः पठेत्
स्तोत्रं दिव्यमिदं सदा न हि भवेत्तस्यासुखं किञ्चन ।
किं त्विष्टार्थसमृद्धिरेव कमलानाथप्रसादोदयात्
कीर्तिर्दिग्विदिता विभूतिरतुला साक्षी हयास्योऽत्र हि ॥ ३१ ॥

य इति । यः पुरुषः भक्त्या माहात्म्यज्ञानपूर्वकप्रीत्या गुरुश्चासौ राघवेन्द्रश्च, गुरुत्वं चानेकधा, सम्प्रदायप्रवर्तकत्वेन उपदेशकत्वेन अनुग्राहकत्वेनेति, अत्र च राघवेन्द्रस्य गुरुत्वं यथासम्भवं ज्ञेयम् । तस्य राघवेन्द्रस्य चरणद्वन्द्वं पादयुगलं स्मरन् चिन्तयन्, तथा इदं दिव्यं स्तोत्रं सदा पठेत् भक्त्येत्य-स्याप्यत्रानुकर्षः, तस्य पुरुषस्य किंचन किंचिदपि असुखं सुखेतरत् दुःखं न हि भवेत् । पृच्छति किंत्विति उत्तरमाह इष्टार्थसमृद्धि-

Scanned by CamScanner

रिति। इष्टानां अपेक्षितानामर्थानां प्रयोजनानां फलानामिति यावत्। समृद्धिः अभिवृद्धिः भवेत् एवं भवेदिति पूर्वपदस्यानुकर्ष इति ज्ञेयम्। तत्र हेतुमाह **कमलेति।** कमलायाः इन्दिरायाः नाथः स्वामी लक्ष्मीपतिरिति यावत् तस्य प्रसादोदयात् प्रसादस्य उदयात्॥ आविर्भवादित्यर्थः। गुरुप्रसादे सम्पादिते तदन्तर्गतः रमारमणः प्रसन्नो भवतीति भावः। कमलानाथप्रसादोदया-दिष्टार्थसमृद्धिर्भवेदिति पूर्वेणान्वयः। तथा दिग्विदिता दिग्विजय-शालिनी कीर्तिः यशः भवेत् तथा अतुला असदृशी विभूतिरैश्वर्यं भवेत्। अत्र उक्तार्थे हयास्यो हयग्रीवः साक्षी साक्षिरूपप्रमाण-मित्यर्थः। साक्षिसिद्धत्वे असंशय[1] इति भावः॥ ३१॥

इति श्रीराघवेन्द्रार्यगुरुराजप्रसादतः।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिर्ह्यप्पणाभिधैः॥
॥ ३२॥

कविः स्तोत्रान्ते स्वनाम निबध्नाति **इतिश्रीति॥**

॥ इति श्रीधीरेन्द्रतीर्थविरचितश्रीराघवेन्द्रस्तोत्रव्याख्या समाप्ता॥

पूज्याय राघवेन्द्राय सत्यधर्मरताय च।
भजतां कल्पवृक्षाय नमतां कामधेनवे॥
आपादमौलिपर्यन्तं गुरूणामाकृतिं स्मरेत्।
तेन विघ्नाः प्रणश्यन्ति सिद्ध्यन्ति च मनोरथाः॥

---

[1] साक्षिसिद्धेत्वसंशयः।

Scanned by CamScanner